# ॥ श्रीप्रत्यङ्गिरासहस्रनामस्तोत्रम् ॥

.. ShrIpratyangira Sahasranamastotra ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : shrIpratyangirAsahasranAmastotram
File name : pratyangirAsahasranAmastotra.itx
Category : sahasranAma
Location : doc_devii
Language : Sanskrit
Subject : philosophy/hinduism/religion
Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
Description-comments : https://mahakalshakti.wordpress.com
Source : shrIrudrayAmale tantre dashavidyA rahasye
Latest update : August 7, 2015
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ श्रीप्रत्यङ्गिरासहस्रनामस्तोत्रम् ॥

श्रीरुद्रयामले तन्त्रे दशविद्या रहस्ये

ईश्वर उवाच
श्रुणु देवि प्रवक्ष्यामि साम्प्रतं त्वत्पुरःसरम् ।
सहस्रनाम परमं प्रत्यङ्गिरायाः सिद्धये ॥

सहस्रनामपाठे यः सर्वत्र विजयी भवेत् ।
पराभवो न चास्यास्ति सभायां वासने रणे ॥

तथा तुष्टा भवेद्देवी प्रत्यङ्गिरास्य पाठतः ।
यथा भवति देवेशी साधकः शिव एव हि ॥

अश्वमेध सहस्राणि वाजपेयस्य कोटयः ।
सकृत्पाठेन जायन्ते प्रसन्ना यत्परा भवेत् ॥

भैरवोऽस्य ऋषिश्छन्दोऽनुष्टुप देवी समीरिता ।
प्रत्यङ्गिरा विनियोगः स्यात्सर्वसम्पत्ति हेतवे ॥

सर्वकार्येषु संसिद्धिः सर्वसम्पत्तिदा भवेत् ।
एवं ध्यात्वा पठेद्देवीं यदी छेदात्मनो हितम् ॥

अथ ध्यानम् ॥

आशाम्बरा मुक्तकचा घनच्छविर्ध्येया स चर्मासिकरा विभूषणा ।
दंष्ट्रोग्रवक्त्रा ग्रसिताहिता त्वया प्रत्यङ्गिरा शङ्कर तेजसेरिता ॥

ॐ अस्य श्री प्रत्यङ्गिरा सहस्रनाम महामन्त्रस्य,
भैरव ऋषिः, अनुष्टुप छन्दः, श्री प्रत्यङ्गिरा देवता,
ह्रीं बीजं, श्रीं शक्तिः, स्वाहा कीलकं
मम सर्वकार्य सिद्ध्यर्थे जपे पाठे विनियोगः ।
ॐ देवी प्रत्यङ्गिरा सेव्या शिरसा शशिशेखरा ।
सममासा धर्मिणी च समस्तसुरशेमुषी ॥ १॥

सर्वसम्पत्तिजननी समधीः सिन्धु सेविनी ।
शम्भुसीमन्तिनी सोमाराध्या च वसुधा रसा ॥ २॥

रसा रसवती वेला वन्या च वनमालिनी ।
वनजाक्षी वनचरी वनी वनविनोदिनी ॥ ३॥

वेगिनी वेगदा वेगबला स्थानबलाधिका ।
कला कलाप्रिया कौलि कोमला कालकामिनी ॥ ४॥

कमला कमलाक्ष्या च मलस्या कमलावती ।
कुलीना कुटीला कान्ता कोकिला कुलभाषिणी ॥ ५॥

कीरकेलिः कला काली कपालिन्यपिकालिका ।
केशिनी च कुशावर्त्ता कौशाम्बी केशवप्रिया ॥ ६॥

काशी काशापहाकाशी शङ्काशा केशदायिनी ।
कुण्डली कुण्डलीस्था च कुण्डलाङ्गदमण्डिता ॥ ७॥

कुशापाशी कुमुदनी कुमुद्प्रीतिवर्धिनी ।
कुन्दप्रिया कुन्दरुचिः कुरङ्गमदमोदिनी ॥ ८॥

कुरङ्गनयना कुन्दा कुरुवृन्दाभिनन्दिनी ।
कुसुम्भकुसुमा किञ्चित्कणत्किङ्किणिका कटुः ॥ ९॥

कठोरा करणा कण्ठा कौमुदी कम्बुकण्ठिनी ।
कपर्दिनी कपटिनी कठिनी कालकण्ठिका ॥ १०॥

किबृहस्ता कुमारी च कुरुन्दा कुसुमप्रिया ।
कुञ्जरस्था कुञ्जरता कुम्भि कुम्भस्तनद्वया ॥ ११॥

कुम्भिगा करभोरुश्च कदलीदलशालिनी ।
कुपिता कोटरस्था च कङ्काली कन्दशोदरा ॥ १२॥

एकान्तवासिनी किञ्चित्कम्पमान शिरोरुहा ।
कादम्बरी कदम्बस्था कुङ्कुमी प्रेमधारिणी ॥ १३॥

कुटुम्बिनी प्रियायुक्ता क्रतुः क्रतुकरी क्रिया ।
कात्यायनी कृत्तिका च कार्तिकेयप्रवर्त्तिनी ॥ १४॥

कामपत्नी कामधात्री कामेशी कामवन्दिता ।
कामरूपा कामगतिः कामाक्षी काममोहिता ॥ १५॥

खड्गिनी खेचरी खञ्जा खञ्जरीटेक्षणा खला ।
खरगा खरनासा च खरास्या खेलनप्रिया ॥ १६॥

खरांशुः खेटिनी खरखट्वाङ्गधारिणी ।
खलखण्डिनि विख्यातिः खण्डिता खण्डवी स्थिरा ॥ १७॥

खण्डप्रिया खण्डखाद्या सेन्दुखण्डा च खञ्जनी ।
गङ्गा गोदावरी गौरी गोमत्यापिच गौतमी ॥ १८॥

गया गौगजी गगना गारुडी गरुडध्वजा ।
गीता गीताप्रिया गायत्रि गोत्रक्षयकरी गदा ॥ १९॥

गिरिभूपालदुहिता गोगा गोकुलवर्धिनी ।
घनस्तनी घनरुचि घनारु घननिःस्वना ॥ २०॥

घूत्कारिणी घूतकरी घुघूकपरिवारिता ।
घण्टानादप्रिया घण्टा घनाघोट प्रवाहिनी ॥ २१॥

घोररूपा च घोरा च घूनीप्रीति घनाञ्जनी ।
घृताची घनमुष्टिश्च घटाघण्टा घटामृता ॥ २२॥

घटास्या घटानाद्यैश्च घातपातनिवारिणी ।
चञ्चरीका चकोरी च चामुण्डा चीरधारिणी ॥ २३॥

चातुरी चपला चारुश्चला चेला चलाचला ।
चतुश्चिरन्तना चाका चिया चामी करच्छविः ॥ २४॥

चापिनी चपला चम्पूश्चिन्ता चिन्तामणिश्चिता ।
चातुर्वर्ण्यमयी चञ्चप्रचौरा चापा चमत्कृतिः ॥ २५॥

चक्रवर्ति वधूश्चक्रा चक्राङ्गा चक्रमोदिनी ।
चेतश्चरी चित्तवृति रचेता चेतनप्रदा ॥ २६॥

चाम्पेयी चम्पक प्रीतिश्चण्डी चण्डालवासिनी ।
चिरञ्जीवितदाचित्ता तरुमूलनिवासिनी ॥ २७॥

छरिकां छत्रमध्यस्था छिद्रा छेदकरी छिदा ।
छुच्छुन्दरी पालयित्री छुन्दरीभनिभस्वना ॥ २८॥

छलिनी छलवच्छिन्ना छिटिका छेककृत्तथा ।
छद्मिनी छान्दसी छाया छायाकृच्छ्रादिरित्यपि ॥ २९॥

जया च जयदा जातिजृम्भिनी जामलायुता ।
जयापुष्पप्रिया जाया जाप्य जाप्यजगज्जनिः ॥ ३०॥

जम्बूप्रिया जयस्था च जङ्गमा जङ्गमप्रिया ।
जन्तु जन्तुप्रधाना च जरत्कर्णा जरद्गवा ॥ ३१॥

जाताप्रिया जीतनस्था जीमूतसदृशच्छविः ।
जन्याजनहिता जाया जम्भ जम्भिलशालिनी ॥ ३२॥

जवदा जववद्वाहा जमानी ज्वरहा ज्वरी ।
झञ्झानीलमयी झञ्झाझणत्कार कराचला ॥ ३३॥

झिण्टीशा झस्यकृत् झम्पायमत्रासनिवारिणी ।
टङ्कारस्था टङ्कधरा टङ्काराकारणा टसी ॥ ३४॥

ठकुराठीत्कुतिश्चैव ठिण्ठीरवसनावृत्ता ।
ठण्ठानीलमयी ठण्ठाठणत्कार कराठसा ॥ ३५॥

डाकिनी डामरा चैव डिण्डिमध्वनिनादिनी ।
ढक्काप्रियस्वना ढक्कातपिनी तापिनी तथा ॥ ३६॥

तरुणी तुन्दिला तुन्दा तामसी च तपःप्रिया ।
ताम्रा ताम्राम्बरा ताली तालीदलविभूषिणी ॥ ३७॥

तुरङ्गा त्वरिता तोता तोतला तादिनी तुला ।
तापत्रयहरा तारा तालकेशीतमालिनी ॥ ३८॥

तमालदलवच्छाया तालस्वनवती तमी ।
तामसी च तमिस्रा च तीव्रा तीव्रपराक्रमा ॥ ३९॥

तटस्यागिल तैलाक्ता तारिणी तपनद्युतिः ।
तिलोत्तमा तिलककृत्तारकादेशशेखरा ॥ ४०॥

तिलपुष्पप्रिया तारा तारकेशकुटुम्बिनी ।
स्थाणुपत्नी स्थितिकरी स्थलस्था स्थलवर्धिनी ॥ ४१॥

स्थितिस्थैर्या स्थविष्ठा च स्थावतिः स्थूलविग्रहा ।
दन्तिनी दण्डिनी दीना दरिद्रा दीनवत्सला ॥ ४२॥

देवी देववधू दैत्यदमिनी दन्तभूषणा ।
दयावती दमवती दमदा दाडिमस्तनी ॥ ४३॥

दन्दशूकनिभा दैत्यदारिणी देवतानना ।
दोलाक्रीडा दयायुश्च दम्पती देवतामयी ॥ ४४॥

दशा दीपस्थिता दोषा दोषहा दोषकारिणी ।
दुर्गा दुर्गार्तिशमनी दुर्गमा दुर्गवासिनी ॥ ४५॥

दुर्गन्धनाशिनी दुःस्था दुःस्वप्नशमकारिणी ।
दुर्वारा दुन्दुभिध्वाना दूरगा दूरवासिनी ॥ ४६॥

दरदा दरहा दात्री दयादा दुहिता दशा ।
धुरन्धरा धुरीणा च धौरेयी धनदायिनी ॥ ४७॥

धीरा धीराधरित्री च धर्मदा धीरमानसा ।
धनुर्धरा च धमिनी धूर्त्ता धूर्त्तपरिग्रहा ॥ ४८॥

धूमवर्णा धूमपानां धूमला धूममोदिनी ।
नलिनीनन्दनीरन्दा नन्दिनी नन्दबालिका ॥ ४९॥

नवीना नर्मदा नर्मीर्नेमिर्नियमनिश्चया ।
निर्मला निगमाचरा निम्नगा नग्निका निमिः ॥ ५० ॥

नाला निरन्तरानिघ्नी निर्लोपा निर्गुणा नतिः ।
नीलग्रीवा निरीहा च निरञ्जनजनी नवी ॥ ५१ ॥

नवनीतप्रिया नारी नरकार्णवतारिणी ।
नारायणी निराकारा निपुणा निपुणप्रिया ॥ ५२ ॥

निशा निद्रा नरेन्द्रस्थानमिता नमितापि च ।
निर्गुण्डिका च निर्गुण्डा निर्मांसा नासिकाभिधा ॥ ५३ ॥

पताकिनी पताका चपलप्रीतिर्यशश्विनी ।
पीना पीनस्तना पत्नी पवनाशनशायिनी ॥ ५४ ॥

परा पराकला पाका पाककृत्यरतिप्रिया ।
पवनस्था सुपवना तापसिप्रीतिवर्द्धिनी ॥ ५५ ॥

पशुवृद्धिकरी पुष्टिः पोषणी पुष्पवर्द्धिनी ।
पुष्पिणी पुस्तककरा पुन्नागतलवासिनी ॥ ५६ ॥

पुरन्दरप्रिया प्रीतिः पुरमार्गनिवासिनी ।
पेशा पाशकरा पाशबन्धहा पांशुलापशुः ॥ ५७ ॥

पटः पटाशा परशुधारिणी पाशिनी तथा ।
पापघ्नी पतिपत्नी च पतिताऽपतितापि च ॥ ५८ ॥

पिशाची च पिशाचघ्नी पिशिताशनतोषिता ।
पानदा पानपात्रा च पानदानकरोद्यता ॥ ५९ ॥

पेषा प्रसिद्धिः पीयूषा पूर्णा पूर्णमनोरथा ।
पतद्गर्भा पतद्गात्रा पौनःपुण्यपिवापुरा ॥ ६० ॥

पङ्किला पङ्कमग्ना च पामीपा पञ्जरस्थिता ।
पञ्चमा पञ्चयामा च पञ्चता पञ्चमप्रिया ॥ ६१ ॥

पञ्चमुद्रा पुण्डरीका पिङ्गला पिङ्गलोचना ।
प्रियङ्गुमञ्जरी पिण्डी पण्डिता पाण्डुरप्रभा ॥ ६२ ॥

प्रेतासना प्रियालुस्था पाण्डुघ्नी पीतसापहा ।
फलिनी फलदात्री च फलश्री फणिभूषणा ॥ ६३ ॥

फूत्कारकारिणी स्फारा फुल्लफुल्लाम्बुजासना ।
फिरङ्गहा स्फीतमतिः स्फितिः स्फीतिकरीतथा ॥ ६४ ॥

वनमाया बलारातिर्बलिनी बलवर्द्धिनी ।
वेणुवाद्या वनचरी वीरा विजयिनीअपि ॥ ६५॥

विद्या विद्याप्रदा विद्याबोधिनी वेददायिनी ।
बुधमाता च बुद्धा च वनमालावती वरा ॥ ६६॥

वरदा वारुणी वीणा वीणावादनतत्परा ।
विनोदिनी विनोदस्था वैष्णवी विष्णुवल्लभा ॥ ६७॥

विद्या वैद्यचिकित्सा च विवशा विश्वविश्रुता ।
वितन्द्रा विह्वला वेला विरावा विरतिज्वरा ॥ ६८॥

विविधार्क करावीरा बिम्बोष्ठी बिम्बवत्सला ।
विन्ध्यस्था वीरवन्द्या च वरीयानपराचवित् ॥ ६९॥

वेदान्त वेद्य वैद्या च वेदस्य विजयप्रदा ।
विरोधवर्द्धिनी वन्ध्या बन्धनिवारिणी ॥ ७०॥

भयिनी भगमाला च भवानी भयभाविनी ।
भीमा भीमानना भैमी भङ्गुरा भीमदर्शना ॥ ७१॥

भिल्ली भल्लधरा भीरु भेरुण्डीभी भयापहा ।
भगसर्पिण्यपि भगा भगरूपा भगालया ॥ ७२॥

भगासना भगामोदा भेरी भङ्काररञ्जिनी ।
भीषणा भीषणारावा भगवत्यपिभूषणा ॥ ७३॥

भारद्वाजी भोगदात्री भवघ्नी भूतिभूषणा ।
भूतिदा भूमिदात्री च भूपतित्वप्रदायिनी ॥ ७४॥

भ्रमरी भ्रामरीनीला भूपालमुकुटस्थिता ।
मता मनोहरमना मानिनी मोहनी मही ॥ ७५॥

महालक्ष्मीर्मदक्षीबा मदीय मदिलालया ।
मदोद्धता मदङ्गस्था माधवी मधुमादिनी ॥ ७६॥

मेधा मेधाकरी मेध्या मध्या मध्यवयस्थिता ।
मद्यपा मांसला मत्स्यमोदिनी मैथुनद्धता ॥ ७७॥

मुद्रा मुद्रावती माता माया महिम मन्दिरा ।
महामाया महाविद्या महामारी महेश्वरी ॥ ७८॥

महादेववधूर्मान्या मधुरा वीरमण्डला ।
मेदस्विनी मीलदश्रीर्महिषासुरमर्दिनी ॥ ७९॥

मण्डपस्था मठस्था च मदिरागमगर्विता ।
मोक्षदा मुण्डमाला च माला मालाविलासिनी ॥ ८० ॥

मातङ्गिनी च मातङ्गी मतङ्गतनयापि च ।
मधुस्रवा मधुरसा मधूककुसुमप्रिया ॥ ८१ ॥

यामिनी यामिनीनाथभूषायावकरञ्जिता ।
यवाङ्कुरप्रियामाया यवनी यवनाधिपा ॥ ८२ ॥

यमघ्नी यमकन्या च यजमानस्वरूपिणी ।
यज्ञायज्वायजुर्यज्वा यशोनिकरकारिणी ॥ ८३ ॥

यज्ञसूत्रप्रदा ज्येष्ठा यज्ञकर्मकरी तथा ।
यशस्विनी यकारस्था यूपस्तम्भनिवासिनी ॥ ८४ ॥

रञ्जिता राजपत्नी च रमारेखा रवेरणी ।
रजोवती रजश्चित्रा रजनी रजनीपतिः ॥ ८५ ॥

रागिणी राज्य नीराज्या राज्यदा राज्यवर्धिनी ।
राजन्वती राजनीतिस्तथा रजतवासिनी ॥ ८६ ॥

रमणी रमणीया च रामा रामावती रती ।
रेतोवती रतोत्साहा रोगहृद्रोगकारिणी ॥ ८७ ॥

रङ्गा रङ्गवती रागा रागज्ञा रागकृद्रणा ।
रञ्जिका रञ्जिकारञ्जा रञ्जिनी रक्तलोचना ॥ ८८ ॥

रक्तचर्मधरा रञ्जा रक्तस्था रक्तवादिनी ।
रम्भा रम्भाफलप्रीति रम्भोरु राघवप्रिया ॥ ८९ ॥

रङ्गभृद्रङ्ग मधुर रोदसी रोदसीग्रहा ।
रोधकृद्रोध हन्त्री च रोगभृद्रोगशायिनी ॥ ९० ॥

वन्दी वन्दिस्तुता बन्ध बन्धूककुसुमाधरा ।
वन्दिता वन्दितामाता विन्दुरा वैन्दवी विधा ॥ ९१ ॥

विङ्कि विङ्कपला विङ्का विङ्कस्था विङ्कवत्सला ।
वदिर्विलग्नाविप्रा च विधिर्विधिकरी विधा ॥ ९२ ॥

शङ्खिनी शङ्खवलया शङ्खमालावती शमी ।
शङ्खपात्राशिनीशङ्खा शङ्खा शङ्खगला शशी ॥ ९३ ॥

शंवी शरावती श्यामा श्यामाङ्गी श्यामलोचना ।
श्मशानस्था श्मशाना च श्मशानस्थलभूषणा ॥ ९४ ॥

शमदा शमहन्त्री च शाकिनी शङ्कुशेखरा ।
शान्तिः शान्तिप्रदा शेषा शेषस्था शेषदायिनी ॥ ९५॥

शेमुषी शोषिणीशीरी शौरिः शौर्या शरा शिरिः ।
शापहा शापहानीश शम्पा शपथदायिनी ॥ ९६॥

श्रृङ्गिणी श्रृङ्गपलभुक् शङ्करी शङ्करीचया ।
शङ्का शङ्कापहा संस्था शाश्वती शीतला शिवा ॥ ९७॥

शिवस्था शवभुक्ता वाशाववर्णा शिवोदरी ।
शायिनी शावशयना शिंशपा शिशुपालिनी ॥ ९८॥

शवकुण्डलिनी शैवा शङ्करां शिशिराशिरा ।
शवकाञ्ची शवश्रीका शवमाला शवाकृतिः ॥ ९९॥

शयनीशङ्कुवा शक्तिः शन्तनुः शीलदायिनी ।
सिन्धु सरस्वतीसिन्धुः सुन्दरी सुन्दरानना ॥ १००॥

साधुः सिद्धिः सिद्धिदात्री सिद्धा सिद्धसरस्वती ।
सन्ततिः सम्पदा सम्पत्संविन्त्सरतिदायिनी ॥ १०१॥

सपत्नी सरसा सारा सरस्वतिकरी स्वधा ।
सरःसमा समाना च समाराध्या समस्तदा ॥ १०२॥

समिद्धा समदा सम्मा सम्मोहा समदर्शना ।
समितिः समिधा सीमा सावित्री सविधा सती ॥ १०३॥

सवनी सवनादारा सावना समरा समी ।
सिमिरा सतता साध्वी सध्रीचिन्त्यसहायिनी ॥ १०४॥

हंसी हंसगतिर्हंसा हंसोज्ज्वल निचोलुयुक् ।
हलिनी हलदा हाला हरश्री हरवल्लभा ॥ १०५॥

हेला हेलावती हेषा ह्लेषस्था ह्लेषवर्द्धिनी ।
हन्ता हन्तिर्हता हत्याहा हन्त तपहारिणी ॥ १०६॥

हङ्कारी हन्तकृद्धङ्का हीहा हाता हताहता ।
हेमप्रदा हंसवती हारी हातरिसम्मता ॥ १०७॥

होरी होत्री होलिका च होमा होमो हविर्हरिः ।
हारिणी हरिणीनेत्रा हिमाचलनिवासिनी ॥ १०८॥

लम्बोदरी लम्बकर्णा लम्बिका लम्बविग्रहा ।
लीला लोलावती लोला ललनी लालिता लता ॥ १०९॥

ललामलोचना लोच्यलोलाक्षी लक्षणा लला ।
लम्पती लुम्पती लम्पा लोपामुद्रा ललन्तिनी ॥ ११०॥

लन्तिका लम्बिका लम्बा लघिमा लघुमध्यमा ।
लघीयसी लघुदयी लूता लूतनिवारिणी ॥ १११॥

लोमभृल्लोम लोप्ता च लुलुती लुलुसंयती ।
लुलायस्था च लहरी लङ्कापुरपुरन्दरी ॥ ११२॥

लक्ष्मीर्लक्ष्मीप्रदा लक्ष्म्या लक्षबलमतिप्रदा ।
क्षुण्णाक्षुपाक्षणाक्षीणा क्षमा क्षान्तिः क्षणावती ॥ ११३॥

क्षामा क्षामोदरी क्षीमा क्षौमभृत्क्षत्रियाङ्गना ।
क्षया क्षयाकरी क्षीरा क्षीरदा क्षीरसागरा ॥ ११४॥

क्षेमङ्करी क्षयकरी क्षयतत्क्षणदाक्षतिः ।
क्षुरन्ती क्षुद्रिका क्षुद्रा क्षुत्क्षामाक्षरपातका ॥ ११५॥

॥ फलश्रुति ॥

मातुः सहस्रनामेदं प्रत्यङ्गिर्याः प्रदायकम् ॥ १॥

यः पठेत्प्रयतो नित्यं स एव स्यान्महेश्वरः ।
अनाचान्तः पठेन्नित्यं दरिद्रो धनदो भवेत् ॥ २॥

मूकः स्याद्वाक्पतिर्देवि रोगी निरोगतां व्रजेत् ।
अपुत्रः पुत्रमाप्नोति त्रिषुलोकेषु विश्रुतम् ॥ ३॥

वन्ध्यापि सूते तनयान् गावश्च बहुदुग्धदाः ।
राजानः पादनम्राः स्युस्तस्यदासा इव स्फुटाः ॥ ४॥

अरयः सङ्क्षयं यान्ति मनसा संस्मृता अपि ।
दर्शनादेव जायन्ते नरा नार्योऽपि तद्वशाः ॥ ५॥

कर्ता हर्ता स्वयंवीरोजायते नात्रसंशयः ।
यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ॥ ६॥

दुरितं न च तस्यास्ते नास्ति शोकाः कदाचन ।
चतुष्पथेऽर्धरात्रे च यः पठेत्साधकोत्तमः ॥ ७॥

एकाकी निर्भयो धीरो दशावर्तं स्तवोत्तमम् ।
मनसा चिन्तितं कार्यं तस्य सिधिर्न संशयः ॥ ८॥

विना सहस्रनाम्ना यो जपेन्मन्त्रं कदाचन ।
न सिद्धो जायते तस्य मन्त्रः कल्पशतैरपि ॥ ९॥

कुजवारे श्मशाने च मध्यान्हे योजपेदथ ।
शतावर्त्या सर्जयेत कर्ता हर्ता नृणामिह ॥ १०॥

रोगान्तर्धौनिशायान्ते पठिताम्मसि संस्थितः ।
सद्यो नीरोगतामेति यदि स्यान्निर्भयस्तदा ॥ ११॥

अर्द्धरात्रे श्मशाने वा शनिवारे जपेन्मनुम् ।
अष्टोत्तरसहस्रं तद्दशवारं जपेत्ततः ॥ १२॥

सहस्रनाम चेत्तद्धि तदा याति स्वयं शिवा ।
महापवनरूपेण घोरगोमायुनादिनी ॥ १३॥

तदायदि न भीतिः स्यात्ततो द्रोहीति वा भवेत् ।
तदापशुबलिं दद्यात्स्वयं गृण्हाति चण्डिका ॥ १४॥

यथेष्टं च वरं दत्त्वा याति प्रत्यङ्गिरा शिवा ।
रोचनागुरुकस्तूरी कर्पूर मदचन्दनः ॥ १५॥

कुङ्कुम प्रथमाभ्यां तु लिखितं भूर्जपत्रके ।
शुभनक्षत्रयोगे तु कृत्रिमाकृत सत्क्रियः ॥ १६॥

कृत सम्पातनासिद्धि धारयेद्दक्षिणे करे ।
सहस्रानामस्वर्णस्थं कण्ठेवापी जितेन्द्रियः ॥ १७॥

तदायन्त्रे नमेन्मन्त्री क्रुद्धा सम्म्रियते नरः ।
यस्मै ददाति यः स्वस्ति स भवेद्धनदोपमः ॥ १८॥

दुष्टश्वापद जन्तूनां न भीः कुत्रापि जायते ।
बालकानामिमां रक्षां गर्भिणीनामपि ध्रुवम् ॥ १९॥

मोहनं स्तभनाकर्षणमारणोच्चाटनानि च ।
यन्त्रधारणतो नूनं जायन्ते साधकस्य तु ॥ २०॥

नीलवस्त्रे विलिखतं ध्वजायां यदि तिष्ठति ।
तदा नष्टा भवत्येव प्रचण्डा परिवाहिनी ॥ २१॥

एतज्जप्तं महाभस्म ललाटे यदि धारयेत् ।
तद्दर्शनत एव स्युः प्राणिनस्तस्य किङ्कराः ॥ २२॥

राजपत्न्योऽपि वशगाः किमन्याः परयोषितः ।
एतज्जप्तं पिबेत्तोयं मासैकेन महाकविः ॥ २३॥

पण्डितश्च महादीक्षौ जायते नात्रसंशयः ।
शक्तिं सम्पूज्य देवेशि पठेत्स्तोत्रं वरं शुभम् ॥ २४॥

इहलोके सुखम्भुक्त्वा परत्र त्रिदिवं व्रजेत् ।
इतिनामसहस्रं तु प्रत्यङ्गिरा मनोहरम् ॥ २५॥

गोप्यं गुप्ततमं लोके गोपनीयं स्वयोनिवत् ॥ २६॥

॥ इति श्रीरुद्रयामले तन्त्रे दशविद्या रहस्ये
श्रीप्रत्यङ्गिरासहस्रनमस्तोत्रम् सम्पूर्णम् ॥

www.mahakalshakti.wordpress.com
Raj Verma mahakalshakti at gmail.com www.scribd.com/mahakalshakti
Proofread by Ravin Bhalekar ravibhalekar at hotmail

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. ShrIpratyangira Sahasranamastotra ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*